1.मम्मटमनुसृत्य काव्यकारणानि निरूप्यन्ताम्।

सर्वाणि कार्याणि हि कारणजातानि। काव्यस्य कार्यत्वात् तस्यापि कारणमस्ति इति कृत्वा संस्कृतालंकारशास्त्रे काव्यकारणविषये प्रभूतं पर्यालोचनं कृतम्। मम्मटपूर्वाचार्यैः भामहदण्डिप्रभृतिभिः काव्यस्य हेतुत्रयम् अङ्गीकृतम्- प्रतिभा व्युत्पत्तिः अभ्यासश्चेति। एतयोः पूर्वाचार्ययोः पदाङ्कम् अनुसृत्य मम्मटेन काव्यकारणम् उक्तं काव्यप्रकाशे-

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।

काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे।। इति।

तत्र शक्तिर्हि प्रतिभा कवित्ववीजरूपसंस्कारविशेषः। शक्तिं विना काव्यं न प्रसरेत् रचितं वा उपसनीयं भवेत्। मम्मटोक्तं लोकशास्त्रकाव्याद्यवेक्षणं हि व्युत्पत्तिः। काव्यरचनायाः प्राक् स्थावरजङ्गमान्मकस्य लोकवृत्तस्य ज्ञानं प्रयोजनीयम्। लोकस्तु भुवने जने इत्यमरवचनात् लोकशब्देन जनाः भुवनवृत्तानि च वोध्यानि। शास्त्राणां च छन्दोव्याकरणाभिधानकोषाणां कलाविद्यानां शस्त्रादिविद्यानां तथा महाकविनिवद्धानां काव्यानां तथा इतिहासादीनां पर्यालोचनात् जायते व्युत्पत्तिः। एषा हि काव्यस्य द्वितीयं कारणम्। काव्यरचनायास्तृतीयं कारणं हि अभ्यासः। ये काव्यं रचयितुं तथा विचारयितुं जानन्ति तदुपदेशेन काव्यरचनायाः पुनः पुनः प्रयासः हि अभ्यासः। मम्मटमते एते त्रयः हेतवः समुदिता न तु व्यस्ताः काव्यस्य निर्माणे उत्कर्षे च हेतुर्न हेतवः।

शक्तिः - वृत्तौ प्रतिभायाः स्वरूपवर्णने मम्मटेन वामनमतं विशेषतः अनुसृतम्। वामनेन उक्तं काव्यालंकारसूत्रवृत्तौ - कवित्ववीजं प्रतिभानम् इति। कवित्ववीजं जन्मान्तरागतसंस्कारविशेषः कश्चिद यस्माद् विना काव्यं न निष्पद्यते हास्यायतनं स्यात्। अभिनवगुप्तमतेन प्रतिभा हि अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा। राजशेखरेण काव्यमीमांसायामुक्तं या शब्दग्रामम् अर्थसार्थम् अलंकारतन्त्रम् उक्तिमार्गम् श्रन्यदपि तथाविधम् अधिहृदयं प्रतिभासयति सा प्रतिभा इति। प्रतिभाया वैशिष्ट्यं हि रसपरिवेषणनैपुण्यं दोषराहित्यं सौन्दर्यबोधप्रकाशनमिति। राजशेखरेण प्रतिभाया द्वैविध्यं प्रकाशितं कारयित्री प्रतिभा (कवेः) भावयित्री प्रतिभा (सहृदयस्य) इति।

निपुणता - अनेन शब्देन व्युत्पत्ति र्बोधिता मम्मटेन। नानाशास्त्रचर्चाया जातं यत् सुदृढं ज्ञानं तज्जन्यः संस्कारः हि निपुणता। स्थावराणां जङ्गमानां लोकवृत्तानां ज्ञानं कवेरावश्यकम्।

कविना काव्यरचनायाः प्राक् छन्दःशास्त्रं व्याकरणं कोषशास्त्रं चतुषष्ठि कलाविद्याः चतुर्वर्गविषयकं ज्ञानम् तथा हस्त्यश्वादिविषयकविद्या शस्त्रविद्यादि विषये नैपुण्यम् अर्जनीयम्। कविना अपरेषां कवीनां काव्यान्यपि अधीतव्यानि। एतदेव लक्ष्यज्ञत्वम् इति वामनेनोक्तम्।

अभ्यासः - काव्यज्ञानां सविधे उपविश्य तेषाम् उपदेशग्रहणं कविना कर्तव्यम्। एषा हि वृद्धसेवा इत्युक्तं वामनेन। काव्यज्ञस्य उपदेशानुसारेण पुनः पुनः शब्दयोजने प्रयासः हि अभ्यासः। पुनः पुनः आधानोद्धरणमाध्यमेन एवं कविः यथायथपदविन्यासे समर्थो भवति।

एतेषां त्रयाणां कारणानां मध्ये शक्तिरेव वलिष्ठा मन्तव्या। तथापि मम्मटेन त्रयाणां मिलितरूपेण काव्यकारणत्वम् अङ्गीकृतम्। । अतएव वृत्तौ तेनोक्तम्- 'हेतुर्न हेतवः" इति। एतस्मिन् विषये मम्मटेन दण्डिमतम् अनुसृतम्। तस्मात् उक्तानां त्रयाणां हेतूनां कोऽपि अन्यनिरपेक्षतया काव्यकारणं भवितुं नार्हति इति शम्।

2. मम्मटप्रदत्तं काव्यलक्षणं प्रतिपदव्यावृत्तिपूर्वकं व्याख्यायताम्।

काव्यप्रकाशे प्रथमोल्लासे मम्मटेन काव्यप्रयोजनकारणयो निरूपणात् परं काव्यस्य लक्षणं वर्णितम्। तल्लक्षणं हि "तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि" इति। अत्र "तत्" इति शब्देन काव्यं वोद्धव्यम्। लक्षणवाक्ये शब्दार्थौ इति विशेष्यम्। तस्य त्रीणि विशेषणानि हि - अदोषौ, सगुणौ, अनलंकृती पुनः क्वापि इति च।

अदोषौ - शब्दार्थौ दोषहीनौ भवेताम् इत्यर्थः। रस एव काव्ये मुख्यः तस्य व्याघातकः हि दोष इति मम्मटस्याशयः। मम्मटस्तस्य पूर्वाचार्यस्य भामहस्य पदाङ्कम् अनुसृत्य काव्ये शब्दार्थयोः उभयोः प्राधान्यम् अङ्गीकृतवान्। भामहेन काव्यलक्षणं कृतम् शब्दार्थौ सहितौ काव्यमिति। भामहेन पुनरुक्तं काव्ये एकमपि पदं दोषयुक्तं न वक्तव्यम्। दण्डिनापि प्रोक्तं "तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन" इति। कविः काव्ये स्वल्पमपि दोषं न उपेक्षेत। सर्वथा दोषरहितं भवेत् तस्य काव्यम् इति वोधनार्थ मम्मटेन "अदोषौ" इति पदं काव्यलक्षणे प्रदत्तम्। किन्तु परवर्तिनि काले अदौषौ इति पदं समालोचितम् काव्यतत्त्वविद्भिः। प्रथमतः नञर्थकेन शब्देन लक्षणकरणं प्रथाविरुद्धम्। किञ्च सम्पूर्णदोषहीनं काव्यं न सम्भवति। यदि तु उच्यते अत्र ईषदर्थे नञः प्रयोगः कृत इति तत्रापि ईषदोषविशिष्टौ शब्दार्थौ काव्यम् इत्यर्थः आपद्येत। यदि कदापि कविना दोषहीनं काव्यं रचितं स्यात् तदा तत् काव्यपदवाच्यं न स्यात्, ईषद् दोषयुक्तस्य काव्यत्वात्।

भवतु, काव्यं रसविघातक शब्दार्थरहितं भवेदित्यत्र न कस्यचिद् विमतिः। मम्मटस्यापि अयमाशयः बोद्धव्यः।

सगुणौ - काव्यस्य शब्दार्थौ गुणविशिष्टौ भवेताम् इत्यर्थः। मम्मटमते गुणा हि रसस्यान्तरङ्गा धर्माः। रस एव काव्ये अङ्गी। गुणा हि काव्ये अपरिहार्यरूपेण वर्तन्ते अतएव शब्दार्थयोः सगुणत्वं तेनोक्तम्। माधुर्यम् ओजः प्रसाद इत्यादयः गुणाः रसोत्कर्ष साधयन्तः काव्यस्यापि उत्कर्षं घटयन्ति इति मम्मटस्य मतम्।

किन्तु सगुणाविति पदमपि न लक्षणे देयम् इति समालोचकानाम् आशयः। यतः यस्मिन् काव्ये गुणा न सन्ति तस्यापि अलंकारवत्त्वात् काव्यत्वम् अङ्गीक्रियते सहृदयैः।

अनलंकृती पुनः क्वापि - मम्मटमते सर्वत्र सालंकारौ शब्दार्थौ एव काव्यत्वेन इष्टौ, किन्तु क्वचिद् अलंकार विरहेऽपि न काव्यत्वहानिः स्याद् इति। मतमेतत् तेन सदृष्टान्तं प्रतिपादितं काव्यप्रकाशे प्रथमोल्लासे। तत्र "यः कौमारहरः स एव हि वर" इति दृष्टान्ते विभावना बिशेषोक्तिश्चेति अलंकारद्वयम् अस्फुटं वर्तते। तथापि शृङ्गाररसस्य अभिव्यक्तिवशाद् अत्र काव्यत्वम् अङ्गीकर्तव्यम्। रसस्य च प्राधान्यात् रसवद् इत्यलंकारोऽपि नात्र स्वीकार्यः। काव्ये रस एव अङ्गी। अलङ्काराः शब्दार्थद्वारा रसोपकारका भवन्ति। उक्तश्लोके विभावना अस्फुटा वर्तते यतः कार्यस्य उत्कण्ठायाः किमपि कारणं न प्रदर्शितम्।

किन्तु विशेषोक्तिप्रसङ्गः च आयाति। यतः अनुत्कण्ठायाः कारणे सति अनुत्कण्ठाया अभावः वर्तते। विभावनाया विशेषोक्तेश्च अस्फुटत्वेऽपि श्लोकोऽयम् उत्तमकाव्यतया मन्यते। समालोचकमते काव्ये अलंकारस्य गौणत्वात् लक्षणे अलंकारोल्लेखो न युज्यते।

मम्मटकृतमिदं काव्यलक्षणं विश्वनाथजगन्नाथादिभिः अर्वाचीनैः आलंकारिकैः बहुधा समालोचितम्। वस्तुतः मम्मटस्य काव्यलक्षणे प्राचीननवीनमतयोः समन्वय एव दृष्टिगोचरो भवति। तत्कालप्रचलनानुसारेण शब्दार्थगुणालंकारा दोषश्च काव्यलक्षणे अन्तर्भाविता मम्मटेन इति शम्।

3.काव्यस्य कति भेदाः। मम्मटमतेन प्रत्येकं सोदाहरणं व्याख्येयम्?

आचार्यमम्मटः एतद् पूर्वम् काव्यप्रकाशे काव्यस्वरूपं, काव्यकारणं काव्यप्रयोजनं च विशदीकृत्य सम्प्रति तद् भेदान् उपस्थापयन्ति। आचार्यमम्मटः त्रिविधं काव्यं अथवा काव्यस्य त्रयः भेदाः इति स्पष्टं करोति। काव्यभेदाः सन्ति- उत्तमकाव्यं मध्यमकाव्यम् अधमकाव्यम् इति च।

उत्तमकाव्यम् - उत्तमकाव्यविषये आचार्यः स्पष्टयति यत्-

इदमुत्तममतिशयिनि व्यङ्गये वाच्याद् ध्वनिर्बुधैः कथितः ।।

इदमिति काव्यम् बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्गयव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः। अर्थात् यस्मिन् काव्ये मुखार्थस्य अपेक्षया प्रतीयमानस्य अर्थस्य अर्थात् व्यङ्ग्यार्थस्य चमत्कारः भवति। तेन व्यङ्ग्यार्थस्य अधिक चमत्कारेण तद् काव्यम् उत्तमकाव्यम् अस्ति। वुधाः अर्थात् काव्यमर्मज्ञाः इदं मतम् ध्वनिकाव्यरूपेण प्रकटयन्ति। अतः उत्तमकाव्यमेव ध्वनिकाव्यम्, ध्वनिकाव्यमेव उत्तमकाव्यम्। अस्मिन् भेदे यद्यपि वाच्यार्थस्य उपस्थिति भवति परन्तु व्यङ्ग्यार्थस्य प्रभावेन वाच्यमहत्त्वं तिरोहति। उदाहरणं यथा-

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो

नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।

मिथ्यावादिनि! दूति! वान्धवजनस्याज्ञातपीड़ागमे

वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥

अस्मिन् श्लोके चतुर्थचरणे इतो वापीं स्नातुं गतासि, न तु तस्य अधमस्य (नायकस्य) समीपम् अस्य अर्थस्य प्रतीति अधिकतया भवति। परन्तु वास्तविक अर्थः व्यञ्जनया प्रतीयते यत् त्वं इतो तस्यैव अधमनायकस्य समीपे रन्तुं रमणं कर्तुं गतासि, न तु वापीं स्नातुम्।

मध्यमकाव्यम् - मध्यमकाव्यस्य लक्षणं आचार्यमम्मटः अनेन प्रकारेण सम्पादयति। लक्षणं यथा-

अतादृशि गुणीभूतव्यङ्गयं व्यङ्गे तु मध्यमम् ।

अर्थात् यत्र व्यङ्ग्यार्थः तु भवति परन्तु वाच्यार्थस्य अपेक्षया विशेषरूपेण चमत्कारि न भवति। अस्मिन् भेदे व्यङ्गार्थः वाच्यार्थं न प्रभावयति। अनेकैः आचार्यैः अस्य भेदस्य उल्लेखः गुणीभूतव्यङ्ग्यरूपेण कृतोऽस्ति। अर्थात् अयमेव भेदः गुणीभूतव्यङ्ग्यम् अस्ति। अत्र व्यङ्ग्यार्थस्य अपेक्षया वाच्यार्थस्य चमत्काररूपेण उपस्थितिः भवति। उदाहरणं यथा-

ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।

पश्यन्त्या भवति मुहुनिर्तरां मलिना मुखच्छाया ॥

अस्मिन् उदाहरणे वञ्जुललतागृहे दत्त संकेतां नायिका न गता इति व्यङ्ग्यम्। गुणीभूतस्य अपेक्षया वाच्यार्थस्य एव चमत्कारः अधिकरूपेण दृश्यते। लक्षणमध्ये इदमपि कथयितुं शक्यते यत् अस्मिन् भेदे वाच्यार्थः प्रधानः, व्यङ्ग्यार्थः गौणोऽस्ति।

अधमकाव्यम् - अधमकाव्यम् निम्नकाव्यं भवति। अस्य काव्यस्य परिभाषा आचार्येण अनेन प्रकारेण दर्शिता। लक्षणं यथा-

शब्दचित्रं वाच्यचित्रमव्यङ्गयं त्ववरं स्मृतम् ।।

चित्रमिति गुणालंकारयुक्तम्। अव्यङ्गयमिति स्फुटप्रतीयमानार्थरहितम्। अवरम् अधमम्। अधमकाव्ये शब्दानां वाक्यानां च केवलं चमत्कारः भवति। व्यङ्ग्यस्य अत्र सर्वथा अभावः दृश्यते। इदमेव अवरं काव्यमपि कथ्यते। अनुप्रासस्य कारणेन अथवा शब्दचमत्कारदर्शनेच्छया एतादृशानां शब्दाडम्बराणां प्रयोगं क्रियते। अतः अत्र शब्दचित्रम् इति अधमकाव्यम् भवति। उदाहरणं यथा-

स्वच्छन्दोच्छलदच्छ-कच्छ-कुहरच्छातेतराम्बुच्छटा-

-मूर्च्छन् मोह-महर्षिहर्षविहित-स्नानाह्निकाह्नाय वः ।

भिद्यादुयदुदारदर्दुरर्धदरी दीर्खादरिद्रद्रुम-

द्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥

अस्मिन् उदाहरणे निमीलिताक्षीव इति अंशे उत्प्रेक्षानामकस्य अर्थालंकारस्य चमत्कारत्वात् अत्र वाच्यचित्रम् इति अधमकाव्यम् भवति।

विनिर्गतं मानदमात्ममन्दिराद् भवत्युपश्रुत्य यदृच्छयापि यम् ।

ससंभ्रमेन्द्रद्रुतपातितार्गला-निमीलिताक्षीव भियाऽमरावती ।।

अतः एतैः त्रिभिः भेदैः काव्यस्य गणना आचार्येण कृता। मुख्यरूपेण आचार्येण उत्तमकाव्यस्य , अथवा अधमकाव्यस्येव प्रयोगं करोति, न तु अधमकाव्यस्य। यतः अधमकाव्यं क्वचिदपि सम्मानं न लभते।

4. सर्वेषां प्रायशोऽर्थीनां व्यञ्जकत्वमपीष्यते । इति व्याख्यायताम्।

उत्सः - आचार्येण मम्मटेन विरचितस्य काव्यप्रकाशम् इति ग्रन्थस्य प्रथमे उल्लासे कारिका इयम् समुपलभ्यते।

प्रसङ्गः - सर्वेषाम् अर्थानां व्यञ्जकताविषये कारिका इयम् उल्लिखिता।

व्याख्या - आचार्यमम्मटः त्रिविधानां शब्दानां त्रिविधाः अर्थाः इति स्पष्टं करोति। अस्यां कारिकायां आचार्यः स्पष्टं करोति यत् वाच्यार्थे लक्ष्यार्थे व्यङ्ग्यार्थे क्रमशः व्यङ्ग्यार्थस्येव सर्वत्र अपेक्षा दृश्यते। अर्थात् वाच्यार्थेऽपि व्यङ्ग्यार्थं भवति। अनेन प्रकारेण लक्ष्यार्थेऽपि व्यङ्ग्यार्थस्य विद्यमानता दृश्यते। एवं व्यङ्ग्यार्थे तु व्यङ्ग्यार्थः भवति एव। सर्वेषु शब्देषु व्यञ्जकता अस्माभिः दृश्यते। या व्यञ्जकता शब्दे दृश्यते तस्य उपस्थितिः अर्थेऽपि एव। अनेन प्रकारेण त्रिविधेषु अर्थेषु कविः चमत्कारस्य आयोजनं करोति। सः चमत्कारः एव व्यञ्जकता अस्ति। व्यञ्जकतया वयं वक्तरि, श्रोतरि तथा च अवसरेषु अवदाम। अतएव आचार्येण कारिकायां प्रायशो इति शब्दस्य प्रयोगः कृतोऽस्ति। त्रिविधाः अर्थाः अन्यस्य अर्थस्य व्यञ्जका भवन्ति। यदा ते अन्यम् अर्थं अभिव्यञ्जयति तदा ते स्वकीयं रूपमपि न व्यजन्ति। यथा-

मातगृहोपकरणमद्य खलु नास्तीति साधितं त्वया ।

तद् भण किं करणीयमेवमेव न वासरः स्थायी ।।

अस्मिन् उदाहरणे काचिद् स्वच्छन्द-विहारिणी-नायिका इदं व्यञ्जयति यत्, गृहोपकरणानां माध्यमेन सा गृहात् वहिः गन्तुम् इच्छति। तद् व्याजेन तत्र विहर्तुम् इच्छति यत्र गमनस्य तस्याः इच्छा वर्तते।